[४५४] समानशब्दाद् ठञ्[1] वक्तव्यः। (म. भा. २. ३१०)

समाने भवं सामानिकम्[2]।

[४५५] तदादेश्च। (म.भा.२. ३१०)

सामानग्रामिकम्। सामानदेशिकम्।

[४५६] अध्यात्मादिभ्यश्च। (म. भा. २. ३१०)

आध्यात्मिकम्। आधिदैविकम्। आधिभौतिकम्। अध्यात्मादिराकृतिगणः।

[४५७] ऊर्ध्वन्दमाच्च ठञ् वक्तव्यः। (म. भा. २. ३१०)

और्ध्वन्दमिकः। ऊर्ध्वशब्देन समानार्थ ऊर्ध्वन्दमशब्दः।

[४५८] ऊर्ध्वदेहाच्च। (म. भा. २. ३१०)

और्ध्वदेहिकम्।

[४५९] लोकोत्तरपदाच्च। (म.भा. २. ३१०)
ऐहलौकिकम्। पारलौकिकम्।

[४६०] मुखपार्श्वशब्दाभ्यां तसन्ताभ्यामीयः प्रत्ययो वक्तव्यः। (म. भा. २. ३१०)
मुखतीयम्। पार्श्वतीयम्।

[४६१] जनपरयोः कुक् च। (म. भा.२. ३१०)
जनकीयम्। परकीयम्।

[४६२] मध्यशब्दादीयः[3]। (म. भा. २. ३१०)
मध्यीयः।

[४६३] मण्मीयौ च प्रत्ययौ वक्तव्यौ। (म.भा. २.३१०)
माध्यमम्। मध्यमीयम्।

[४६४] मध्यो मध्यं दिनण् चास्मात्। (म. भा. २.३१०)
मध्ये भवं माध्यन्दिनम्।

[४६५] स्थाम्नो लुग् वक्तव्यः। (म. भा. २.३१०)
अश्वत्थामा।

[४६६] [4]अजिनान्ताच्च। (म. भा. २. ३१०)
वृकाजिनः। सिंहाजिनः[5]।

---

1. प्रत्ययो भवति इति वक्तव्यम् ब. क. इ. 2. अनुशतिकादिपाठात् उभयपदवृद्धिः इत्यधिकम् ड. ह. 3. प्रत्ययो भवतीति वक्तव्यम् इत्यधिकम् फ. 4. वार्तिकमिदं नास्ति ब. 5. व्याघ्राजिनम् वृषभाजिनम् इत्यधिकम् फ. ह.